संस्कृत - वेदांत 2472

क्र.नं. ५०

२ ८

ब्रह्ममीमांसा - चतुःसूत्री

२ ... ४६४/२८

संस्थान सांगली वेदशारत्र विद्यालय

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥ श्रीः ॥ ब्राह्मणसभा ॥ ठाकुरद्वार मुंबई. ता० ५ मार्च सन १९१० इ० सा० न० वि० वि० सुप्रसिद्ध वेदशास्त्रसंपन्न श्रीधरशास्त्री टोणगांवकर राहणार भडगांव यांचें कीर्तन व प्रवचन अनुक्रमें ता० ७ सोमवार रोजीं संध्याकाळीं ६॥ वाजतां व ता० ९ बुधवार रोजीं संध्याकाळीं ५ वाजतां (स्टँ. टा.) सभेच्या दिवाणखान्यांत करविण्याचें ठरलें आहे; तरी उभयवेळीं मित्रमंडळींसह आपण येण्याची कृपा करावी. कळावें, लोभ असावा, हे विनंति. लक्ष्मण चिंतामण गोळे, अनंत लक्ष्मण देशमुख, चिटणीस- ब्राह्मण सभा. विजय प्रेस- मुंबई.

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

## संस्थान सांगली वेदशास्त्र विद्यालय.

श्रीमंत, स्टेट कारभारी साहेब (कुमठेकर) यांस. पत्र लिहिण्यास कारण वेदशास्त्रसंपन्न राजश्री श्रीधर नारायण शास्त्री टोणगांवकर राहणार खानदेश पूर्व भाग जिल्हा पैकीं पेटा भडगांव. हे माझ्याकडे आले होते त्यांचे विचार करितांना अद्वैत वेदांत व वेदाध्ययन करून वेदभाष्य आणि व्याकरण सिद्धांतकौमुदी नाटकादि साहित्य शास्त्रांतील अभ्यास केले आहेत. हे येथें कधीं हि आले न होते पुनः ये

तील असा ही निश्चय नाहीं तरी यांस उत्तम रीतीनें संभावन होण्याविषयींत-जवीज व्हावी.॥ राक्षसनाम संवत्सर चैत्र शुद्ध ८ शके १८३७ ॥ डोळ्यांनीं अपंग सबब हे निशाण व्यंकट रमणाचार्य शीरहट्टीकर व्याकरणशाळा गुरुजीचें॥ वि०(विद्यार्थी) श्रीनिवासाचार्य पुरोहित.॥

---

॥ श्रीः॥ (हरवल्यास पुनः मिळणार नाहीं.)

सभास्थापन शके १८०७ आश्विन पासून ना) अनुक्रमांक ९२५ वर्ग दोन २

## सत्कारपत्र.

श्रीक्षेत्र कोल्हापूर येथील वेदशास्त्र भ्यासाभिनंदिनी सभे कडून.

वे. शा. रा. रा. श्रीधर नारायणशास्त्री टोणगांवकर वास्तव्य भडगांव जिल्हा खानदेश. ऋग्वेदी वय ६६ यांनी शास्त्राध्ययन केलें असून वेदांगाचे व तर्क मीमांसादिकांचें साहाय्यानें हे वेद भागांचें प्रवचन करितात.

परीक्षक. { भाउभट्ट खाडिलकर येडूरकर.
आत्माराम शास्त्री पित्रे.

The Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "Joint project"

सर्वाधिकारी. नारायणरावराजोपाध्याय. (आपासाहेब उपाध्ये बोवा.)
मितिचैत्रकृष्ण १२ शके १८२७. (कोल्हापूर विद्याविलासप्रेस.) शिक्कासभेचा.

श्रीक्षेत्र करवीर. वेदशास्त्राभ्यासाभिनंदिनी सभा.

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

श्रीक्षेत्र करवीर (कोल्हापूर) येथील वेदशास्त्राभ्यासाभिनंदिनी सभेचे सभासद.
१ श्री. तात्यासाहेब जोशीराव. २ श्री. आप्पासाहेब राजोपाध्ये. ३ श्री. बाळासाहेब बावडेकर पंत अमात्य बावडा संस्थानचे अधिपति. ४ रा. ब. विश्वनाथ बल्लाळ गोखले सरन्यायाधीश. ५ रा. ब. कृष्णाजी नारायण पंडित पेन्शनर सरन्यायाधीश. ६ रा. सा. रघुनाथ नारायण आपटे प्रोफेसर व हुजूर बेंचाचे मेंबर. ७ हरीकेशव वाशीकर जंगल आफीसर. रा. सा. ८ रा. सा. मुरलीधर वामन दामले असिस्टंट जज्ज. ९ रा. रा. गोविंदराव सोहनी सरकारी वकील. १० रा. रा. विष्णु विनायक जोशी वकील.

११ रा·रा· रामचंद्र मोरेश्वर आपटे वकील. १२ रा·रा· रामभाऊ पंगु वकील. १३ रा·रा· वासुदेवराव परांडेकर वकील. १४ रा·रा· लक्ष्मणरावजी गोळवलकर पेन्शनर इचलकरंजी. १५ रा·रा· नारायण केशव दातार सावकार. १६ रा·रा· वामन गणेश घाटे सावकार. १७ रा·सा· कृष्णाजी भिकाजी गोखले. १८ रा·सा· गणपतरावजी श्रीखंडे असि. दिवाण. १९ रा·रा· [redacted] भाउराव पोतनीस. २० रा·रा· भाउसाहेब लिमये. २१ रा·रा· दत्तोपंत परांडेकर. (विद्याविलास प्रेस. कोल्हापूर.)

---

॥ श्रीः ॥

श्री जगद्गुरु शंकराचार्य पीठ कोल्हापूर. श्री संस्थानतर्फे सार्वजनिक व्याख्यान व्हावयाचें आहे. सर्वांनीं आपले मिलासह व्याख्यानास अगत्य यावें अशी विनंति आहे. व्याख्यानकार. वे·शा· रा·रा· श्रीधरशास्त्री टोणगांवकर. विषय धार्मिक प्रवचन. ठिकाण श्री जगद्गुरूंचे मठांत. वेळ सायंकाळीं ५॥ वाजतां. ता·१५ माहे एप्रिल सन १९१५ इ· गुरुवार रोजीं. करवीरमठ. गुंडो सखाराम पिशवीकर. सर्वाधिकारी नि· श्री स्वामी जगद्गुरु. (को· श्रीव्यंकटेश प्रेस.)

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

वे. शा. रा. रा. श्रीधर शास्त्री टोणगांवकर वास्तव्य भडगांव. यांनीं वेदार्थावर परिश्रम केले आहेत. कांहीं दिवसापूर्वी यांचे भेटीचा योग आला होता. यांची या वयांत विद्याव्यासंगाची तत्परता पाहून फार संतोष झाला. मु. भांबुर्डे ता. २७ मार्च. सन १९१० इ. शिवराम बापूजी परांजपे माजि-प्रोफेसर राजाराम कॉलेज कोल्हापूर.

---

मीमांसा महाविद्यालय पुणें. १६।१२।१०

वेदशास्त्रसंपन्न श्रीधर नारायणशास्त्री टोणगांवकर राहणार भडगांव जिल्हा पूर्व खानदेश. यांचे आज रविवार मार्गशीर्ष शु. २ शके १८[illegible]९ रोजीं मीमांसा महाविद्यालयाच्या दिवाणखान्यांत दोन प्रहरीं ३ वाजल्यावर २ तास सुश्राव्य प्रवचन झालें. विषय ऋक्संहितेतील "चत्वारि शृंगा" या ऋचेच्या अनुरोधानें वेदमंत्र व त्यांचा विनियोग.

शंकर रामचंद्र राजवाडे चिटणीस.
मीमांसा महाविद्यालय पुणें.

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai"

तृप्तिदीपः प्रकरणं ७ पंचदशी- ॥गीतिः। धन्योहं धन्योहं नित्यंस्वात्मानमंजसावेद्मि॥ धन्योऽ
हं धन्योऽहं ब्रह्मानंदो विभाति मे स्पष्टम्॥१॥(२९२) धन्योऽहं धन्योऽहं दुःखं सांसारिकं न वीक्ष्येऽ
द्य॥ धन्योहं धन्योहं स्वस्याज्ञानं पलायितं क्वापि ॥२॥(२९३) धन्योहं धन्योहं कर्तव्यं मे न
विद्यते किंचित्॥ धन्योहं धन्योहं प्राप्तव्यं सर्वमद्य संपन्नम्॥३॥(२९४) धन्योहं धन्योहं तृ
प्ते मे कोपमा भवेल्लोके॥ धन्योहं धन्योहं धन्योधन्यः पुनः पुनर्धन्यः॥४॥(२९५) अहोपु
ण्यमहो पुण्यं फलितं फलितं दृढम्॥ अस्य पुण्यस्य संपत्ते रहो वयमहो वयम्॥५॥(२९६)
अहो शास्त्रमहो शास्त्रमहो गुरुरहो गुरुः॥ अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखम्॥६॥(२९७)
तृप्तिदीपमिमं नित्यं येऽनुसंदधते बुधाः॥ ब्रह्मानंदे निमज्जंतस्ते तृप्यंति निरंतरम्॥७॥(२९८)
इतिश्री विद्यारण्य पंडित स्वामिनः॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

१ . व्याकरणविचारः॥ नादिन्याक्रोशे पुत्रस्य॥८।४।
४८॥(५५) पुत्रशब्दस्य न द्वे स्तः आदिनी शब्दे परे आक्रोशे गम्यमाने।
पुत्रादिनी त्वमसि पापे। आक्रोशे किम्। तत्त्वकथने द्विर्वचनं भवत्ये-
व। पुत्त्रादिनी सर्पिणी॥ तत्परे चेति वार्तिकं॥ (स आदिनी शब्दोय-
स्मात्परः तस्मिन् परेऽपि पुत्रशब्दस्य न द्वे स्तः इत्यर्थः।) पुत्रपुत्रादिनी
त्वमसि पापे॥ वा हतजग्धयोः॥ वार्तिकम्॥ पुत्रहती पुत्त्रहती। पुत्रज-
ग्धी। पुत्त्रजग्धी॥ इति कौमुदीकारः॥ अत्र शंका। सूत्रवृत्तौ आ-
दिनि शब्दे परे इत्युक्तं। इत्यनेनेदं सिद्धं भवति ननु किम्। सूत्रे आदिनि
इति भिन्नमुक्तं भवद्भिः। सूत्रे आदिन् शब्दो दृश्यते। 'आदिनी' इति
स्त्रीलिंगशब्दः स्वीकृतः उदाहरणे। अत्र लिंगविशिष्ट परिभाषा
याः प्रमाणं दत्तम्। "प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्र-
हणम्" इति परिभाषा प्रामाण्यात् पुत्रादी त्वमसि पापिन्
इत्युक्तेऽपि न बाधः। परमत्र सूत्रसंबंधेन यदुक्तं ~~तद्यथा~~।
~~[illegible]~~ शेखर ग्रंथे तद्यथा। पुत्रा
दिनी त्वमसि पापे इत्ययमाक्रोशः स्त्रियमेव युक्तः। अस्या-
प्रयोगस्तत्रैव कर्तुं योग्यः। नान्यत्र पुंसि क्लीबे वेति॥ अत्र
भवन्मतं शेखरग्रंथविरुद्धं दृश्यते। अयमाक्रोशो युक्तः त्रि
लिंगं प्रति। अतः सामान्यः न कश्चिद्विशेष इति भवदाकूतम्।
तत्रतावत् सूत्रे आदिन्याक्रोशे (आदिन्यां आक्रोशे) इति योगवि
भागं कृत्वा तस्य वृत्तिः आदिनीशब्दे परे इति कृतायां सत्यां न बाधः। एव
मयमाक्रोशः केवलः स्त्रियमेवेति गम्यते न पुंसि क्लीबेवेति। अथवा
या युक्तिः परिभाषया भवद्भिः कृता सापि युक्तेति मे भाति। 'आदिनीं' इ
ति विशेषणं केवलं स्त्रिय एव नान्यस्येति शेखरे उक्तं तत्तु भवद्भिर्न उक्तं
तदत्रावश्यं लेखनीयमिति मे भाति। उपरिष्टाल्लिखितेन आदिनीति प-

Joint Project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

दयोगविभागेनैवचारितार्थ्यात्। भवद्भिरयं प्रयासः कृतः सोऽत्रन युक्तइतिमेभाति। एवं मयोक्तेभवतां मतं वा अमतमित्यनुशासनीयंभवद्भिरिति कश्चितशंकाकारः॥ अस्याः शंकायाः समाधानम्। "नादिन्या क्रोशे पुत्रस्य" इत्यत्र आक्रोशार्थः स्त्रीविषयकत्वात् तासामेवयुक्तः। अतः स्त्रीलिंगनिदर्शनमेव युक्तम्। तथापीदं लोकव्यवहारादिद्धेयम्। नचतस्यसंबंधो व्याकरणशास्त्रे। सामान्यतः शेखरग्रंथस्य तात्पर्यं कौमुदीग्रंथस्य दोषाविष्करणे दृश्यते न ग्रंथसंगतौ। नेदानीं शेखरमनुसरामः। किंतु कौमुदीमनुसरामः। कोऽभिप्रायः कौमुदीकारस्यैतत्स्यामः। भवदाकूतेन "आदिनी आदिन्या-वा" इतिपाठकल्पिते सप्तम्यभावेनान्वयासंभवात्। अपिच आदिनीति पदयोगविभागेनेवचारितार्थ्यात्। भवद्भिरयं प्रयासः कृतः सोऽत्रन युक्तइति भवद्भिरुक्तं तर्हि अपि "वा हतजग्धयोः" इति वार्तिकप्रामाण्यात् पुनरपि संगतेरभावात्। नच तत्र "वा हतीजग्ध्योः" इति स्त्रीलिंगपाठः। अतो भवदुक्तं न युक्तम्॥

---

अथतद्धितेष्वपत्याधिकारः॥ सुधातुरकङ्च॥४।१।९७॥ -पादिञ् ।सुधातुरपत्यं सौधातकिः। व्यासवरुडनिषादचंडालबिंबानां चेति वक्तव्यम्॥इतिवार्तिकम्॥ नय्वाभ्यां पदांताभ्यां पूर्वौ तु ताभ्यामैच्॥७।३।३॥ पदान्ताभ्यां यकारवकाराभ्यां परस्य न वृद्धिः, किंतुताभ्यां पूर्वौ क्रमादैचावागमौस्तः। वैयासकिः। वारुडकिरित्यादि॥इति कौमु०॥ स्त्रीभ्यो ढक्॥४।१।१२०॥ स्त्रीप्रत्ययांतेभ्यो ढक् स्यात्। वैनतेयः। बा[illegible]-त्वात् सौमित्रिः। शिवादित्वात् सापत्नः। द्व्यचः॥४।१।१२१॥ द्व्यचः स्त्रीप्रत्ययांतादपत्ये ढक्। तन्नामिकाणोऽपवादः। दात्तेयः। पार्थ इत्यत्वतुतस्येदमित्यण्॥ इति कौमुदीकारः॥

॥ अथ अव्ययम्॥

४४९॥कृन्मेजंतः॥१।१।३९॥ कृत् यः मान्तः एजंतश्च तदंतं अव्ययं

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

स्यात्॥ इति कौमु०॥ धात्वधिकारे कथिताः कृदतिङ्।३।१।९३(२७४) इ
ति सूत्रेण ये कृत् संज्ञक प्रत्ययास्तत्रस्थाः मकारांताः ए ऐ ओ औ कारां
तास्तदंतानामव्यय संज्ञा भवति। यथा स्मारं स्मारं पुनः पुनः स्मरणं
कृत्वेत्यर्थः। इति मकारांतं। वैदिके तु एकारांतं। उदुत्तमं मुमुग्धि नो विपा
शं मध्यमं चृत। अवाधमानि जीवसे॥२१॥ ऋ॰ मं॰ १ अष्ट॰ १ अ॰ २ व॰ १९ सू॰ २५
अनु॰ ६॥ नोऽस्माकं उत्तमं शिरोगतं पाशं उन्मुमुग्धि उत्कृष्य मोचय। म
ध्यमं उदरगतं पाशं विचृत वियुज्य नाशय। जीवसे जीवितुं। इति तुमंतं म
कारांतं अव्ययं। जीवितुमिच्छोः। अधमानि पादगतान् पाशान् मदीया
न् अवचृत अवकृष्य नाशय इति सायणाचार्यः। असेन्।३।४।९। अयं
असे प्रत्ययांतः। पिबध्यै पातुं पा-पाने। अयं शध्यै (अध्यै)३।४।९
प्रत्ययांतः॥ ४५० ॥क्त्वातोसुन् कसुनः॥ १।१।४०॥ एतदंतं अव्ययं
स्यात्। क्त्वा ।३।४।१८-२१। तोसुन् तोस्।३।४।१६। कसुन्।अ-
स्।३।४।१७। एतत् प्रत्ययांतशब्दा अव्यय संज्ञका बोध्या इति। कृत्वा उदे
तोः उदेतुं उदयार्थं। विसृपः विसर्पितुं गच्छतुं गमनार्थमिति अव्ययम्॥
॥अव्ययीभावश्च॥१।१।४१॥ अव्ययीभावसमासोऽपि अव्ययसं
ज्ञका एव स्युः। अधिहरि, हराविति॥ ४५२॥ अव्ययादाप्सुपः॥२।
४।८२॥ अव्ययात् विहितस्य आपः सुपश्च लुक् स्यात्। कौ०। अ
व्ययस्य परे उक्ता ये स्त्रीवाचकाः आप् (आ) सुप् (सु औ जस्) एते
षां लुक् स्यात्। भवतीत्यर्थः। यथा तत्र शालायाम्। अत्र शालायामि
ति अयं तत्र अस्यैवार्थः अतः शालाशब्दवत् तत्रं अस्य परेऽपि स्त्रीवाच
कः आप् (आ) सप्तमी प्रत्ययश्च कथितेऽपि प्रस्तुत सूत्रात्तयो लुक् लो-
पः। कुतः 'सप्तम्यास्त्रल्।५।३।१०। इत्यनेन सूत्रेण भविता अयं त्रल् प्र-
त्ययः तसिलादिस्थः अतस्तस्याव्ययत्वम्। इति। अथ (अतः) अयं
चादिगणस्थो निपात अतोऽस्याव्ययत्वम्। तस्मात् परेऽपि विभक्त्यादीनां
लुक् लोपः॥ विहितविशेषणान्नेह। अत्युच्चैसौ। इति कौ०

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥ तत्र तावत् विहितं नाम विवक्षितं [redacted] शब्दपरे कथितं एतादृशविशेषणत्वात् 'अत्युच्चैसौ ( अतिशयेन उच्चै एतादृशौ द्वौ । अत्र औ प्रत्ययस्य लुग भाव : न लोप इत्यर्थः। कुतः अत्युच्चैस्' इति शब्दे परे ऽप्ययं औ प्रत्ययस्तर्हि 'उच्चैस्' अस्य परे अयं नानीतः। अथ तदंतविधित्वात् यदि अयं आनीतस्तर्हि 'अव्यय संज्ञायां यद्यपि तदंत विधिरस्ति तथापि न गौणे॥ इति कौ॰। अस्यार्थः यद्यपि अव्ययसंज्ञायां "प्रयोजनं सर्वनामाव्ययसंज्ञायां" इति भाष्यकारवचनात् तदंतविधिरस्ति तथाप्यस्मिन् शब्दे उच्चैस् अयं न मुख्य शब्दः। अत्युच्चैस् इदमन्यार्थस्य विशेषणं अतस्तस्य गौणत्वात्। तस्माद् गौणत्वादत्र न लुक् न लोप इत्यर्थः।

आप् ग्रहणं व्यर्थं अलिंगत्वात्। इति कौ॰। सूत्रे आप् ग्रहणं व्यर्थं कथमेतत् ? अलिंगान्यव्ययानीति। अत्रानुसंधेयं श्रुतिवाक्यम्। "सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु॥ वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ इति श्रुतिः लिंग कारक संख्या भावात्। एवं सर्वत्र विकाराभावादव्ययम्। इयमाथर्वण श्रुतिः यद्यपि ब्रह्मपरा तथापि भाष्यकारादीनां व्याख्यानादत्राव्यय परेति स्वीकृतेति विज्ञेयम्। इति महो॰सा॰

अथ सुबंत प्रकरण संबंधेन विशेषः। वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः॥ आपं चैव हलंतानां यथा वाचा निशा दिशा॥ इतिकारिका। अस्या अर्थः। अव अपि च इत्युपसर्गे अकार लोप इष्टः इति भागुरि वैयाकरणस्य मतम्। तथैव हलंत स्त्री लिं- [redacted] लिंग शब्दानामाबंतमपीष्टमस्ति। यथा वाच् वाचा निश् निशा। दिश् दिशा। इति। वगाहः। अवगाहः स्नानमित्यर्थः। पिधानं अपिधानं। आच्छादनमित्यर्थः। अत्रापि विकल्पात् द्वे रूपे ग्राह्ये इति बोध्यम्॥ इति अव्यय प्रकरणस्य विवेचनम्॥ ॥ अथ अकच् युक्त शब्दरूप विषये विशेष विचारः॥ सामान्यतः। अव्यय सर्वनाम्नामकच् प्राक्टेः।

Rajawade Samshodhan Mandal Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

इत्यस्मात् सूत्रात् सर्वनामाव्यययोः प्राक् टेः अकच् (अक्) भवति। तदनंतरं विभक्तिप्रत्यया इति। अनाप्यकः। ७।२।११२ (३४६) इत्यनेन अकच्युक्तस्य इदंशब्दस्य नास्त्यनादेशः। इमकेन। नेदमदसोरकोः। ७।१।११ (३४९) तस्मात् अकच्युक्तं इदम्, अदस्। एतान् भिस् स्थाने ऐस् भवति। इमकैः अमुकैः इत्यादिः। अदकस्। अस्य प्रथमैकवचनं असकौ असुकश्चेति। अदस औ सुलोपश्च। ७।२।१०७ (४३७) अदसः औकारः अंतादेशः स्यात् सौ परे सुलोपश्चेति॥ अत्रेदं बोध्यम् अमुकशर्मा अमुकी स्त्रीः। इत्यादि प्रयोगा असाधवः संति। इति॥ • अथ युष्मदस्मद् शब्दे विशेषः। ओकारसकारभकारादिषु सर्वनाम्नष्टेः प्रागकच्। अन्यत्र तु सुबंतस्य टेः प्रागकच्। इत्यत्र ओकारसकारभकारादयः प्रत्ययानामभावात् तत्रादौ सुबंतरूपं सिद्धं कृत्वा ततष्टेः पश्चात् अकच् कर्तव्य इति सुबंतप्रकरणम्॥

अथ तद्धितेषु शेषिकाः॥ एङ् प्राचां देशे। १।१।७५॥

एङ् यस्याचामादिस्तद् वृद्धसंज्ञं वा स्यात् देशाभिधाने। एणीपचनीयः। गोनर्दीयः। भोजकटीयः। पक्षे अणि। ऐणीपचनः। गौनर्दः। भौजकटः। एङ् किम्। आहिच्छत्रः। कान्यकुब्जः॥ वा-नामधेयस्य वृद्धसंज्ञा वक्तव्या॥ इतिवार्तिक[illegible]त्॥ देवदत्तः। देवदत्तीयः। इति कौमुदीकारः॥ अत्रेत्थं मे भाति। यस्याचामादिस्तद् वृद्धसंज्ञं वा स्यात्। यथा भोजकटः। वेति विकल्पः। पक्षे अ[illegible]णीति कौमुद्यामुक्तमेव। तेन अण् इत्यपि भवितुमर्हति। अत्र भगवतः कात्यायनमुनेर्वार्तिकेऽपि 'वा नामधेयस्य वृद्धसंज्ञा वक्तव्या'। यथा देवदत्तः। तथैव दाशरथः इत्यपि भवितुमर्हति। अत्र तर्कवाचस्पतिः तारानाथः। दाशरथम् पु० दशरथस्येद

Joint project of the Rajwade Samshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

अण्। श्रीराम इत्यर्थः। अत्र नाटकप्रयोगस्यापि निदर्शनं कृतं "प्रदीयतां दाशरथाय मैथिली"मिति॥ दाशरथिरिति दशरथस्यापत्यं अत इञ्। इति प्रसिद्धोयं प्रयोगः। एवं दाशरथोपि विकल्पेन वार्तिकप्रामाण्याद्भवतीति प्रयोगः साधुरिति विदो विदां कुर्वन्त्वित्यलं लेखनेन॥ पार्थ इत्यत्र स्त्रीभ्यो ढक् इति सूत्रेण (४।१।१२०) स्त्रीप्रत्ययांतात् अपत्ये ढक्। तन्नामिकाणोऽपवादः। दात्तेयः। तथा पार्थेय इत्यपि विकल्पेन ढक् भवितुमर्हतीति तिमे भाति। अत्र विद्वद्भिर्विचारणीयमिति॥

---

अथ मीमांसा। एकस्योभयार्थकत्वे संयोगपृथक्त्वन्यायः। यथा नित्याग्निहोत्रहोमद्रव्याणि तेषु "दध्ना जुहोति" इत्यत्र नित्याग्निहोत्रहोमो दध्नापि भवतीत्युक्तम्। अपिच "दध्नेंद्रियकामस्य जुहुयात्" इत्यत्र इंद्रियकामना यां सत्यां पुरुषो दध्ना होमं कुर्यात्। इत्यनेन वाक्येन दधिहोमेन सत्यामिंद्रियपाटवरूपकामनायां सापि पूर्णा भवति। अत्र संयोगपृथक्त्वन्यायो बोध्यः। स यथा नित्यत्वं काम्यत्वं चानयोर्द्वयोः संयोगः। कामनाद्वयं दधिहोमेन सिध्यति। यदींद्रियकामना न स्यात् तर्हि दधिहोमेन पृथक्त्वेन नित्यहोमस्यैव सिद्धिर्भवतीति दिक्॥

॥ अथ उपलक्षणं विचार्यते।

उपलक्षणं नाम व्यावर्तकम्। यथा विशेषणमितरव्यावृत्तिदर्शकं तथैवोपलक्षणमपीतरव्यावृत्तिदर्शकम्। यथा "काकवद्देवदत्तस्य गृहं" इत्यत्र कुत्रास्ति देवदत्तस्य गृहमिति प्रश्ने कृते तस्योत्तरं यथा- यस्मिन् गृहे तत्र दिने कस्मिंश्चित्समये काकोऽति-

ष्ठत् नदेव गृहं देवदत्तस्य। अत्रोपलक्षणं काकः। सतु न सर्व-
[illegible]काले। विशेषणं तु सर्वदैवास्ति। इति उपलक्षणम्॥

उद्देश्यस्य विशेषणे विवक्षिते वाक्यभेदः। यथा "रक्तं वस्त्रमान
य" इत्यत्र उद्देश्यं वस्त्रं तस्य विशेषणं रक्तं, इदं यदि विवक्षि-
तं नाम सार्थकं भवेदिति तर्हि "वस्त्रमानयं" इत्यनेन वाक्येनान
यनस्य विधानं। तच्च रक्तं अनेन वाक्येन रक्तत्वस्य विधानमिति॥

अथ दशापवित्रेण ग्रहसंमार्जनन्यायः। सोमयागप्रक
रणे श्रुतिवाक्यं यथा "दशापवित्रेण ग्रहं संमार्ष्टि" इति।
अत्र दशापवित्रं नाम वस्त्रखंडः। ग्रहः सोमरस पात्रम्। वस्त्रखं
डेन ग्रहसंमार्जनं शोधनं कुर्यादित्यर्थः। अत्र पूर्वपक्षः। यथा "प
शुना यजेत" इत्यत्र पशुरुपादेयः विधेयः। तस्य पशोरेकत्वसं-
ख्या विवक्षिता। अतः एकेन पशुना यागः कार्यइत्यर्थो भवति। तथा
ग्रहस्यैकत्वसंख्या विवक्षितमिति मत्वा एकस्य ग्रहस्य संमार्जनं
कार्यमित्यर्थं कुर्यादिति पूर्वपक्षाशयः। अथ सिद्धांतः। ग्रह
मिति द्वितीयया विभक्त्या ग्रहस्योद्देश्यत्वात् प्राधान्यं स्यात्। सं
मार्गशोधनं, अयं गुणस्तेन प्रति प्रधानं प्रति गुणस्यावृत्तिर्भ
वतीति न्यायात्। अतः ये ग्रहास्ते सर्वे शोधनीयाः। तेन इय
त्ताकांक्षा न भवतीति। अतो न उद्देश्यैकत्वसंख्या विवक्षित
मिति। अपिच एकत्व संमार्गयोर्द्वयोर्विधानं कुर्यादित्युक्तं चे
त् वाक्यभेदो भवति। स यथा। ग्रहं संमृज्यात् तं च एकम्। अ
त्र विधेयभिन्नत्वात् द्वे वाक्ये भवतः। तस्मान्नोद्देश्यगतैकत्वसं-
ख्या विवक्षितेति। अथ पशुना यजेत। अत्र यागस्य गुणः अंगं
पशुरस्ति। नात्र प्रतिगुणस्य प्रधानं यागस्यावृत्तिः। अतः कति पश
वः इति ज्ञातुमिच्छा जाता। तत्र पशुशब्दे श्रूयमाणं यदेकवचनं तद्वि
वक्षितं। अत एकेन पशुना यजेत यागं कुर्यादित्यर्थः॥ इति। ॐ तत्सत्॥

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

अथब्रह्ममीमांसा
न्तर्गताचतुःसूत्री ॥
शाङ्करभाष्यव्याख्या
समेता ॥

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai"

॥ जन्माद्यस्य यतः परात्परगुरोर्जातं तदीयं परं तत्वं वेदनि
धौ तदेव गहनं जानाति को मानवः॥ यं कर्मेति वदंति केचन परे
ब्रह्मेति मीमांसकास्तं देवं निगमार्थदं श्रुतिनुतं वंदे मुकुंदं मुदा॥१॥
एकं परेशं बहुधा वदंति ब्रह्मेति कर्मेति च वादिनो ये॥ यो वेत्ति स
र्वं न च तस्य वेत्ता वंदे तमीड्यं निगमार्थसारम्॥२॥ त्रयी सांख्यं
योगः पशुपतिमतं तार्किकमतं तथा बौद्धं लोकायतिकमपरं सौ
गतमिति॥ प्रपंचेऽस्मिन्नानापथगमनशीला जनततिः परं त्वे
कः सेव्यस्त्वमसि भगवन् सात्वतपते॥३॥ हृत्पंकजे मुनिग
णैरघनाशनार्थं ध्यातं सदा चरणपंकजमीश्वरस्य॥ कैवल्य
दं सुविमलं जगदादिबीजं शश्वत्सुखाय मम तद्भवतु प्रकृष्टम्
॥४॥ ये वेदांबुधिपारगाः सुमतयस्तत्वं परं ध्यायिनस्तानुद्दि
श्य नमस्करोमि सततं तेभ्यो नवैषा क्रिया॥ ये शास्त्रेऽकृतबुद्ध
यो निजधिया वेदांतजिज्ञासवो नानाग्रंथविलोकनेऽलस
धियस्तेभ्यो मदीया क्रिया॥५॥

॥ॐ तत्सद्ब्रह्मणेनमः॥ अथचतुःसूत्रीप्रारंभः॥

॥अधिकरणम्॥१ ॥अथातोब्रह्मजिज्ञासा॥१॥

शाङ्करभाष्यम्॥ युष्मदस्मत्प्रत्यय
गोचरयोर्विषयविषयिणोस्तमःप्रका
शवद्विरुद्धस्वभावयोरितरेतरभावानुप
पत्तौसिद्धायांतद्धर्माणामपिसुतरामि
तरेतरभावानुपपत्तिरित्यतोऽस्मत्प्रत्य
यगोचरेविषयिणिचिदात्मकेयुष्मत्प्र
त्ययगोचरस्यविषयस्यतद्धर्माणांचा
ध्यासस्तद्विपर्ययेणविषयिणस्तद्धर्मा
णांचविषयेऽध्यासोमिथ्येतिभवितुंयुक्तम्॥१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

ब्र·मी· अ·पा· १ १ ॥ अथ भाष्यव्याख्या ॥ बादरायणमाचार्यं सूत्रकारं महामु च·सू· १
निम् ॥ तथैव भाष्यकारं च शंकरं लोकशङ्करम् ॥१॥ नत्वा भाष्य अधिक
२ स्य व्याख्येयं कृता सज्जनतोषदा ॥ मुदा पश्यंतु विद्वांसो भक्तियु रणम् १
क्तेन चेतसा ॥२॥ नमः श्रीशङ्कराचार्यपादाब्जायोपकारिणे
॥ तस्य प्रत्युपकाराय नम इत्येव केवलम् ॥३॥ ॥ॐ नमो ब्रह्म
णे ॥ युष्मदिति ॥ युष्मत्प्रत्ययं प्रति विषयो गोचरो भवति ।
४रश्या विषयी गोचरो[redacted]स्मत्प्रत्ययं प्रती[redacted]ति । एतयोरुभयोः स्व
रूपं तमःप्रकाशवत् परस्परं विरुद्धं लोके प्रसिद्धम् । अत एव ए
तयोर्द्वयोस्तादात्म्यं न संभ[redacted]ति । यदीदं सिद्धं तर्हि तद्धर्माणाम
पि परस्परं तादात्म्यं भवितुं न शक्यमिदं सिद्धमेव । तस्मात्तयोस्ता
दात्म्यासंभवादस्मत्प्रत्ययं प्रति गोचरो यो विषयी चिदात्मा त-
स्मिन् चिदात्मनि युष्मत्प्रत्ययं प्रति गोचरो यो विषयस्तस्य विष



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

यस्य विषयधर्माणांचाध्यासस्तद्विपर्ययेण विपरीतः कथम्?
शृणु - विषये विषयिणश्च तद्धर्माणांचाध्यासो यद्यपि मिथ्या
भवितुमर्हस्तदपि धर्मधर्मीचेतौ परस्परावत्यंतभिन्नौ
स्तः। एकस्मादन्यो भिन्न इति विवेको न भवत्यतस्तयोस्तादात्म्य
स्यच परस्परधर्माणामध्यासो भवत्येव ॥१॥ ॥ भाष्यम् ॥

तथाप्यन्योन्यस्मिन्नन्योन्यात्मकतामन्यो
न्यधर्मांश्चाध्यस्येतरेतराविवेकेनात्यंतविवि
क्तयोर्धर्मधर्मिणोर्मिथ्याज्ञाननिमित्तः स
त्यानृते मिथुनीकृत्याहमिदं ममेदमिति नैसर्गि
कोऽयं लोकव्यवहारः ॥ इति ॥२॥२॥ ॥ एवंचान

या रीत्या सत्यानृते मिथुनीकृत्य परस्परं मेलयित्वा "इदमहं
लो ममेदमिति लोकव्यवहारोयं नैसर्गिकः स्वाभाविकः। मि-
थ्याज्ञानंचास्य व्यवहारस्य मूलमेवेति॥ युष्मदस्मत्प्र-

ब्र. मी. भा. पा. १ १ २ त्पयगोचरयो" रित्यारभ्य भवितुं युक्तमित्यंतं शंकारूपं भाष्य च. सू. १
म्। तथापीत्यारभ्य परिहाररूपं विज्ञेयम्। तथापि एतत् परिहा
रग्रंथेऽस्यतोऽस्मिन् शंकाग्रंथे" यद्यपि" इमानिपदान्यध्याहृता-
निस्युरितिविज्ञेयम्। इमानि पदानि" भवितुं" अस्य पदस्य प्राग्वापरे
अध्याहृतानीतिविज्ञेयम्॥ युष्मत् प्रत्ययस्यगोचरो यः स युष्म
त्प्रत्ययगोचरः। युष्मत् प्रत्ययगोचरो नाम युष्मत्प्रत्ययस्य विषय
भूतो युष्मत् प्रत्ययेन निर्दिष्टकृत इत्यर्थः। तथैवास्मत् प्रत्ययस्य वि
ज्ञेयम्॥ विषयीनाम चित्" अयमस्य स्वभावोस्ति स एवायमात्मा
अर्थाच्चित्स्वरूपात्मा चित्स्वरूपं चैतन्यस्वरूपमित्यर्थः। तद्विरु
द्धं जडम्। बुद्धींद्रियदेहविषयाश्चैते जडस्वभावा जडस्वरूपा इ
त्यर्थः। विषया बुद्ध्यादयः शब्दादयश्च। एतेऽनात्मानः। इदं पंचभू-
तात्मकं दृश्यं जगत् तत्सर्वं जडस्वरूपं विज्ञेयम्। । "षिञ्" बंधने
इत्यस्माद्धात्वर्थाद्विषयशब्दः सिद्धः। बुद्ध्यादयो विषयाश्चिदा-

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com